# हरिवंशं – भविष्यपर्व

## नीलकण्ठव्याख्यानसमेतं

## अथ एकादशोऽध्यायः

## सर्वभुतोत्पत्तिः

वैशम्पायन उवाच

**अथ योगविदां श्रेष्ठं सर्वभूतमनोमयम् ।**
**स्रष्टारं सर्वभूतानां ब्रह्माणं सर्वतोमुखम् ॥३-११-१**

लेशतोऽपि न भेदोऽस्ति बाह्याभ्यन्तरविश्वयोः ।
इति वक्तुं मुनिः प्राह षष्टे नाभ्यब्जसम्पदम् ॥ १ ॥

अथेति ।ब्रह्माणं तस्मिन् पद्मे आपवो योजयतीति व्यवहितकर्तृक्रियानुषङ्गेण श्लोकद्वयं सम्बन्धनीयम् ।सर्वभूतमनोमयं जलाकाशवत्प्रतिव्यक्तिपरिसमाप्तं सूत्रात्मानमित्यर्थः ।सर्वतोमुखमिति सर्वतः पाणिपादत्वादेरुपलक्षणम् ॥

**तस्मिन् हिरण्मये पद्मे बहुयोजनविस्तृते ।**
**सर्वतेजोगुणमये पार्थिवैर्लक्षणैर्युते ॥३-११-२**

तेजांसि सूर्यादिनि ।गुणाः गन्धादयः ।पार्थिवे मनोमयेऽपि सर्वस्थूलभूमिलक्षणैर्युक्ते ॥

**तच्च पद्मं पुराणज्ञाः पृथिवीरुहमुत्तमम् ।**
**नारायणाङ्गसंभूतं प्रवदन्ति महर्षयः ॥३-११-३**

पृथिवीरुहं च ।*यच्छरीरं सा पृथ्वी* इति श्रुतेः ।पृथिवी शरीरं तस्यां रोहतीति देहान्तस्थमित्यर्थः ।अत्र हेतुः - नारायणाङ्गसम्भूतम् अन्तर्याम्यङ्गोद्भूतमन्तरेवाऽतीति भावः ॥

या तु पद्मासना देवी पृथिवीं तां प्रचक्षते ।
ये गर्भसाराङ्कुरतस्तान्दिव्यान्पर्वतान्विदुः ॥३-१२-४

पार्थिवैर्लक्षणैर्युत इति यदुक्तं तत्र का पृथिवी कानि च तल्लक्षणानीत्यत आह - या त्विति । पद्मशब्देन तथासनं शरीरं तस्यासनं शरिरं तस्यासनं यत्र सा पृथिवी प्रसिद्धैव । ये गर्भे पाषाणमयत्वात्सारा दृढा सन्तः अंकुरवदुच्छूनास्तान् प्रथमार्थे तासिः विशेषणं तु पिण्डब्रह्माण्डयोरैक्यविवक्षायाम् । पिण्डेऽपि कठिनांशोऽस्थ्यादिः पर्वतत्वेन ज्ञेय इत्येवमर्थः ॥

हिमवन्तं च मेरुं च नीलं निषधमेव च ।
कैलासं मुञ्जवन्तं च तथाद्रिं गन्दमादनम् ॥३-१२-५

पुण्यं त्रिशिखरं चैव कान्तं मन्दरमेव च ।
उदयं कन्दरं चैव विन्ध्यमस्तं च पर्वतम् ॥३-१२-६

एते देवगणानां च सिद्धानां च महात्मनाम् ।
आश्रमाः पुण्यशीलानां सर्वकामयुताद्रयः ॥३-१२-७

युताश्च ते अद्रयश्चेति समासः ॥

एतेषामितरो देशो जम्बूद्वीप इति स्मृतः ।
जम्बूद्वीपस्य सङ्ख्यानम् याज्ञिया यत्र चक्रिरे ॥३-१२-८

यज्ञियं देशमिच्छन्ति ते याज्ञियाः । यत्र चक्रिरे यज्ञं जम्बुद्वीपमेव कर्मभूमिरित्यर्थः ॥

गर्भादयत्स्रवते तोयं देवामृतरसोपमम् ।
दिव्यतीर्थशतापाङ्गास्ता दिव्याः सरिताः स्मृताः ॥३-१२-९

यज्ञस्येत्युपस्थितं संबध्यते तथाहि -
*अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते*
*आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा ॥*

इति यज्ञोद्भवत्वं तोयस्य स्मरन्ति । तीर्थशतान्यपाङ्गो भ्रूभङ्गो यासां ताः दिव्या नद्यो गङ्गाद्याः ब्रह्माण्डं भित्वा मेरुपरि पतित्वा चतुर्दिक्षु प्रस्थिताः ॥

**यान्येतानि तु पद्मस्य केसराणि समन्ततः ।**
**असङ्ख्याताः पृथिव्यां तु विश्वे ते धातुपर्वताः ॥३-१२-१०**

**यानि पद्मस्य पत्राणि भूरीण्यूर्ध्वं नराधिप ।**
**ते दुर्गमाः शैलचिता म्लेच्छदेशा विकल्पिताः ॥३-१२-११**

**यान्यधः पद्मपत्राणि वासार्थं तानि भागशः ।**
**दैत्यानामुरगाणां च पातालं तन्महात्मनाम् ॥३-१२-१२**

**तेषामधोगतं यत्तदुदकेत्यभिसंज्ञितम् ।**
**महापातककर्माणो मज्जन्ते यत्र मानवाः ॥३-१२-१३**

उत् उत्कृष्टं अकं दुःखं यत्र यदुदकेत्यभिसंज्ञितम् ॥

**पद्मस्यान्ते कुशं यत्तदेकार्णवजलं महत् ।**
**प्रोक्तास्ते दिक्षु सञ्ज्ञाताश्चत्वारो जलसागराः ॥३-१२-१४**

पद्मस्य मेरुकर्णिकावतो भूपद्मस्य अन्ते समन्ततः प्रान्ते कुशं कुः पृथिवी शेते अस्मिनिति कुशं जलम् ॥

**प्रादुर्भावोऽप्ययं तस्मान्नाम्ना पुष्करसंभवः ।
ऋषेर्नारायणस्यायं महापुष्करसंभवः ॥३-१२-१५**

ऋषेरिति । व्यावहारिकत्वादयं महापुष्करसंभवः योऽयं योगिहृदयदर्पणे प्रादुर्भावः स तस्मादेव संस्काररूपेण हृदये स्थितास्थूलाद्धेतोः नाम्ना पुष्करसंभव इत्युच्यते । प्रतिबिम्बचैत्रेऽपि चैत्रोऽयमिति व्यवहारस्य बाधादर्शनादेकनामत्वं द्वयोर्युक्तमिति भावः ॥

**एतस्मात्कारणात्तज्ज्ञैः पुराणैः परमर्षिभिः ।
यज्ञियैर्वेददृष्टार्थैर्यज्ञे पद्मचिती कृतः ॥ ३-१२-१६**

व्यवहारमुक्त्वा वस्तुतत्त्वमाह - एतस्मादिति । एतस्मात् अव्यवहितात् प्रकरणवतः योगिकल्पितात्पुष्करसंभवात् महापुष्करसम्भवस्य बीजभूतात् यज्ञियैः कर्मयोगयज्ञार्हैः पद्मचिती पद्मरूपकेण चितं चयनं इष्टकाभिरिति वदस्यास्तीति पद्मचिती स्थूलः पुष्करप्रादुर्भाव कृतो विहितः यतो वेददृष्टार्थैः रतः कृतः । वेदे लोके च सूक्ष्मस्यैव स्थूलत्वं दृष्टं न स्थूलस्य सूक्ष्मत्वम् । न हि बीजं वटो भवतीति वटोऽपि समासहस्रेण बीजीकर्तुं शक्योऽतो मानसादेव पुष्करात् स्थूलस्योत्पत्तिर्युक्तेति भावः ॥

**एवं भगवता पद्मे विश्वस्य परमो विधिः ।
पर्वतानां नदीणां च देवतानां च निर्मितः ॥ ३-१२-१७**

एवमिति । परमो व्यावहारिकः ॥

**विभूस्तथैवाप्रतिमप्रभावः
प्रभाकरो वै भगवान्महात्मा ।
स्वयं स्वयम्भूः शयनेऽसृजत्तदा
जगन्मयं पद्मनिधिं महार्णवे ॥ ३-१२-१८**

विभुरिति । तथैव परमस्तथैव शयने स्थूलदेहविस्मरणे पद्मनां निधिं अनन्तानि पद्मानित्यर्थः । महार्णवे परमात्मनि ॥

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्वणि पौष्करे सर्वभूतोत्पत्तौ द्वादशोऽध्यायः

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्वणि टीकायां द्वादशोऽध्यायः

Harivamsha Maha Puranam - Part 3 - Bhavishya Parva
iitranslated by G. Scaufelberger, scaufel@wanadoo.fr August 22, 2008
Proof-read by K S Ramacandran, ramacandran_ksr@yahoo.ca
Electronic version of Nilakantha commentary by A. Purushothaman, purushu55@gmail.com

Devanagari version prepared using latex-sanskrit package of Charles Wikner

If you find any errors compared to Chitrashala Press edition, send corrections to A. Harindranath, harindranath_a@yahoo.com